श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्रीगुरुपवनपुराधीशाय श्रीकृष्णाय परब्रह्मणे नमः

श्री मेल्पत्तूर् नारायणभट्टतिरेः कृतिषु

# ॥ श्रीमन्नारायणीये पञ्चचत्वारिंशं दशकम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्रीमन्नारायणीये पञ्चचत्वारिंशं दशकम् ॥

## कृष्णस्य बालक्रीडावर्णनम्

अयि सबल मुरारे पाणिजानुप्रचारैः
    किमपि भवनभागान् भूषयन्तौ भवन्तौ।
चलितचरणकञ्जौ मञ्जुमञ्जीरशिञ्जा -
    श्रवणकुतुकभाजौ चेरतुश्चारुवेगात् ॥ **45.1** ॥

मृदु मृदु विहसन्तावुन्मिषद्दन्तवन्तौ
    वदनपतितकेशौ दृश्यपादाब्जदेशौ।
भुजगलितकरान्तव्यालगत् कङ्कणाङ्कौ
    मतिमहरतमुच्चैः पश्यतां विश्वनृणाम् ॥ **45.2** ॥

अनुसरति जनौघे कौतुकव्याकुलाक्षे
    किमपि कृतनिनादं व्याहसन्तौ द्रवन्तौ।
वलितवदनपद्मं पृष्ठतो दत्तदृष्टी
    किमिव न विदधाथे कौतुकं वासुदेव ॥ **45.3** ॥

द्रुतगतिषु पतन्तावुत्थितौ लिप्तपङ्कौ
    दिवि मुनिभिरपङ्कैः सस्मितं वन्द्यमानौ।
द्रुतमथ जननीभ्यां सानुकम्पं गृहीतौ
    मुहुरपि परिरब्धौ द्राग्युवां चुम्बितौ च ॥ **45.4** ॥

स्नुतकुचभरमङ्के धारयन्ती भवन्तं
    तरलमति यशोदा स्तन्यदा धन्यधन्या।

कपटपशुप मध्ये मुग्धहासाङ्कुरं ते
    दशनमुकुलहृद्यं वीक्ष्य वक्त्रं जहर्ष॥ 45.5 ॥

तदनु चरणचारी दारकैस्साकमारा -
    न्निलयततिषु खेलन् बालचापल्यशाली।
भवनशुकविलालान् वत्सकांश्चानुधावन्
    कथमपि कृतहासैर्गोपकैर्वारितोऽभूः॥ 45.6 ॥

हलधरसहितस्त्वं यत्र यत्रोपयातो
    विवशपतितनेत्रास्तत्र तत्रैव गोप्यः।
विगलितगृहकृत्या विस्मृतापत्यभृत्या
    मुरहर मुहुरत्यन्ताकुला नित्यमासन्॥ 45.7 ॥

प्रतिनवनवनीतं गोपिकादत्तमिच्छन्
    कलपदमुपगायन् कोमलं क्वापि नृत्यन्।
सदययुवतिलोकैरर्पितं सर्पिरश्नन्
    क्वचन नवविपक्वं दुग्धमप्यापिबस्त्वम्॥ 45.8 ॥

मम खलु बलिगेहे याचनं जातमास्ता -
    मिह पुनरबलानामग्रतो नैव कुर्वे।
इति विहितमतिः किं देव सन्त्यज्य याच्ञां
    दधिघृतमहरस्त्वं चारुणा चोरणेन॥ 45.9 ॥

तव दधिघृतमोषे घोषयोषाजनाना -
    मभजत हृदि रोषो नावकाशं न शोकः।
हृदयमपि मुषित्वा हर्षसिन्धौ न्यधास्त्वं
    स मम शमय रोगान् वातगेहाधिनाथ॥ 45.10 ॥

शाखाग्रेऽथ विधुं विलोक्य फलमित्यम्बां च तातं मुहुः
सम्प्रार्थ्याथ तदा तदीय वचसा प्रोत्क्षिप्त बाहौ त्वयि।
चित्रं देव शशी स ते करमगात् किं ब्रूमहे सम्पत -
ज्ज्योतिर्मण्डलपूरिताखिलवपुः प्रागा विराड्रूपताम्॥ **45.11** ॥

किं किं बतेदमिति सम्भ्रम भाजमेनं
ब्रह्मार्णवे क्षणममुं परिमज्य तातम्।
मायां पुनस्तनयमोहमयीं वितन्व -
न्नानन्दचिन्मय जगन्मय पाहि रोगात्॥ **45.12** ॥

॥ इति श्रीमन्नारायणीये पञ्चचत्वारिंशं दशकं समाप्तम्॥